# Manukritam Hari Stotram

# મનુકૃતં હરિસ્તોત્રમ્

## Document Information

Text title : Manukritam Hari Stotram

File name : haristotrammanukRRitaM.itx

Category : vishhnu, stotra

Location : doc_vishhnu

Proofread by : PSA Easwaran

Description/comments : Kalikapurana Adhyaya 33 shloka 22-33

Latest update : January 15, 2022

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

January 15, 2022

*sanskritdocuments.org*

# મનુકૃતં હરિસ્તોત્રમ્

મનુરુવાચ -
નમસ્તે જગદવ્યક્તપરાપરપતે હરે ।
પાવકાદિત્યશીતાંશુનેત્રત્રયધરાવ્યય ॥ ૨૨॥

જગત્કારણસર્વજ્ઞ જગદ્ધામ હરે પર ।
પરાપરાત્મરૂપાત્મન્ પારિણાં પારકારણ ॥ ૨૩॥

આત્માનમાત્મના ધૃત્વા ધરારૂપધરો હરે ।
વિભર્ષિ સકલાન્ લોકાનાધારાત્મંસ્ત્રિવિક્રમ ॥ ૨૪॥

સર્વવેદમયશ્રેષ્ઠ ધામધારણકારણ ।
સુરૌઘપરમેશાન નારાયણ સુરેશ્વર ॥ ૨૫॥

અયોનિસ્ત્વં જગદ્યોનિરપાદસ્ત્વં સદાગતિઃ ।
ત્વં તેજઃ સ્પર્શહીનશ્ચ સર્વેશસ્ત્વમનીશ્વર ॥ ૨૬॥

ત્વમનાદિઃ સમસ્તાદિસ્તં નિત્યાનન્તરોઽન્તરઃ ।
યદ્ધૈમમણ્ડં જગતાં બીજં બ્રહ્માણ્ડસંજ્ઞિતમ્ ॥ ૨૭॥

તદ્બીજં ભવતસ્તેજસ્ત્વયોક્તં સલિલેષુ ચ ।
સર્વાધારો નિરાધારો નિર્હેતુઃ સર્વકારણમ્ ॥ ૨૮॥

નમો નમસ્તે વિશ્વેશ લોકાનાં પ્રભવ પ્રભો ।
સૃષ્ટિસ્થિત્યન્તહેતુસ્ત્વં વિધિવિષ્ણુહરાત્મધૃક્ ॥ ૨૯॥

યસ્ય તે દશધા મૂર્તિરૂર્મિષટ્કાદિવર્જિતા ।
જ્યોતિઃ પતિસ્ત્વમમ્ભોધિસ્તસ્મૈ તુભ્યં નમો નમઃ ॥ ૩૦॥

કસ્તે ભાવં વક્તુમીશઃ પરેશ
    સ્થૂલાત્સ્થૂલો યોઽનુરૂપોઽર્થવર્ગાત્ ।
તસ્મૈ નિત્યં મે નમોઽસ્ત્વદ્ય યોઽભૂ-

    દાદિત્યવર્ણં તમસઃ પરસ્તાત્ ॥ ૩૧॥

સહસ્રશીર્ષા પુરુષઃ સહસ્રપાત્
    સહસ્રચક્ષુઃ પૃથિવીં સમન્તતઃ ।
દશાઙ્ગુલં યો હિ સમત્યતિષ્ઠત્
    સ મે પ્રસીદત્વિહ વિષ્ણુરુગ્રઃ ॥ ૩૨॥

નમસ્તે મીનમૂર્તે હે નમસ્તે ભગવન્ હરે ।
નમસ્તે જગદાનન્દ નમસ્તે ભક્તવત્સલ ॥ ૩૩॥

ઇતિ કાલિકાપુરાણે ત્રયસ્ત્રિંશાધ્યાયાન્તર્ગતં
    મનુકૃતં હરિસ્તોત્રં સમ્પૂર્ણમ્ ।

Proofread by PSA Easwaran

---

*Manukritam Hari Stotram*

pdf was typeset on January 15, 2022

Please send corrections to *sanskrit@cheerful.com*